# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

सुखानुभूतिः एका मानसिकस्थितिः ! वस्तुतः शाश्वतसुखं न तु विषयपूर्तिप्रद-बाह्यसाधनेषु आश्रितम् । तत् तु स्वस्वरूपप्राकट्येन अन्तः प्रादुर्भवति ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

यदा शक्तिः एव आत्मबलम् – इति अनुभूतिः प्रारभते तदा बाह्यसाधनावलम्बनं निवृत्य मनः अन्तर्मुखं भवति । हृदयस्थितम् ईश्वरं प्रति आकृष्टं भूत्वा तमेव आश्रयति । तस्य प्रेरणया एव स्वाभिप्रायप्रकटनं सुस्पष्टं भवति ।

गुरूपदेशानुवादः – वरदा सौकूर, मुम्बई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

गीर्वाणपत्रिकायाः तृतीय-पुष्पं श्रीगुरुचरणकमलयोः समर्पयितुं वयम् अत्यन्तं सन्तोषम् अनुभवामः।

सद्यः एव वयं सर्वे दीपावलि-उत्सवं सहर्षम् आचरितवन्तः । दीपावलिः न तु केवलं दीपानां पर्व अपि तु उल्लासस्य नूतन-आशावादस्य च पर्व ।

प्राचीनरामायणादिग्रन्थेषु अपि दीपावल्याः उल्लेखः दृश्यते ।

अस्मिन् पर्वणि एव प्रभुश्रीरामः रावणादिराक्षसान् निहत्य वनवासं समाप्य अयोध्यानगरीं समागतः । तदा चतुर्दशवर्षप्रतीक्षमाणाः अयोध्यावासिनः अतिप्रमुदिताः । श्रीरामस्य स्वागतार्थं चित्रविचित्ररङ्गावलिभिः नानाविधपुष्पमालातोरणैः च ते स्वगृहाणि अलङ्कृत्य राजमार्गेषु सर्वत्र दीपान् प्रज्वाल्य अखिल-अयोध्यानगरीं प्रकाशितवन्तः ।

अयं दीपोत्सवः द्योतयति दुष्टशक्तीः विजित्य सच्छक्तेः विजयम् । तथैव इदं दीपप्रज्वालनम् अस्ति अज्ञानरूपी-अन्धकारस्य विनाशस्य तथा ज्ञानप्राप्तेः प्रतीकम् । “ **तमसो मा ज्योतिर्गमय** ” इति वेदद्रष्टृणाम् अपि आशयः।

गतवर्षाधिककालः कोविडोत्पन्न-भयग्रस्त-विपदवस्थायां तथा सञ्चारनिर्बन्धकाले एव व्यतीतः । परन्तु श्रीगुरुवर्याणाम् अनुग्रहेण मार्गदर्शनेन च मनोबलं संवर्ध्य अस्माभिः जपानुष्ठानसाधनैः अन्तर्मुखं भवितुं सुयोगः सम्प्राप्तः । तस्मात् नैराश्यस्य घोर-तमिस्रायाम् अपि आशायाः परमं ज्योतिः आविर्भूतं , क्षेमकरभविष्यस्य आश्वासनं प्राप्तं च ।

**" गुकारस्त्वन्धकारश्च , रुकारस्तेज उच्यते ।**
**अज्ञानग्रासकं ब्रह्म , गुरुरेव न संशयः ।। " (गुरुगीता - २३)**

गुरुः एव अस्माकं त्राता , ज्ञानदाता । अस्मिन् नूतनवर्षे प्रत्येकस्य जीवनं ज्ञानरूपी-प्रकाशेन प्रदीप्तं , संविन्मयं भवेत् , सर्वत्र सकारात्मकता प्रसृता भवेत् इति श्रीगुरुचरणकमलयोः प्रार्थना ।

– सम्पादिका

## चिन्तनम्

**– गौरी येन्नेमिडी , मुम्बई**

अधोनिर्दिष्टं सुभाषितम् अधिकृत्य गत-अगस्टमासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने बहवः सदस्याः सहभागं गृहीतवन्तः । सर्वैः प्रकटितानां स्वमतानां सारांशः अधः दीयते ।

**सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।**
**आपत्सु च महाशैलशिलासङ्घातकर्कशम् ।।**

अर्थः – प्राप्तायां सम्पत्त्यां महतां चित्तं कमलम् इव कोमलं भवति किन्तु आपत्काले महापर्वतस्य शिला इव कठिनं भूत्वा सङ्घातं लीलया सहते इति ।

सम्पत्तिः इत्युक्ते न केवलं धनम् । सा विविधरूपेषु भवितुं शक्यते । उदाहरणार्थं ज्ञानम् , उत्तम-आरोग्यं , जीवने उत्तमा परिस्थितिः , उच्च-अधिकारप्राप्तिः , पशुधनं , प्रियजनैः पूर्णं कुटुम्बम् इत्यादयः । एतावत् धनं प्राप्य अपि सज्जनानां मनः अतीव कोमलमेव अस्ति । इत्युक्ते तेषां मनः धनेन मदमत्तं न भूत्वा , ते स्वधनस्य उपयोगं स्वार्थायैव न कुर्वन्ति । ये एतेन धनेन वञ्चिताः तेषां प्रति संवेदनशीलाः भूत्वा तेषां साहाय्यार्थे अपि ते स्वधनस्य विनियोजनं कुर्वन्ति विशेषतृप्तिम् अपि अनुभवन्ति च ।

आपत्काले एते महान्तः कथं प्रतिकुर्वन्ति ? ते विचलिताः न भूत्वा कठोरहृदयाः भवन्ति । उचितं विचारं कृत्वैव निर्णयं गृह्णन्ति । ते हतबलाः कदापि न भवन्ति किन्तु अन्येभ्यः आपद्ग्रस्तेभ्यः अपि धैर्यं दत्त्वा कष्टप्रसङ्गात् निर्गन्तुं स्वप्रयत्नेन मार्गम् अन्विष्यन्ति ।

एतस्मात् विपरीता अस्ति दुर्जनानां बुद्धिः । ते विपुलं धनं प्राप्य अहङ्कारिणः भवन्ति । स्वज्ञानम् अन्येभ्यः न दत्त्वा तस्य उपयोगं ते विवादस्य कृते कुर्वन्ति । अद्यतनकाले नैकान् देशानपि एतस्यां श्रेण्यां गणयितुं शक्यम् । यथा जागतिकयुद्धकाले केचन प्रबलाः देशाः अण्वस्त्राणि निर्माय अन्यदुर्बलदेशानाम् उपरि क्षिप्त्वा तेषां सम्पूर्णं नाशं कृतवन्तः। तथैव आपत्काले दुर्जनाः हतबलाः भूत्वा किङ्कर्तव्यमूढाः भवन्ति । स्वस्य अहङ्कारप्रवृत्तिकारणेन ते सहकारिणां साहाय्यम् अपि न प्राप्नुवन्ति ।

अतः अस्मिन् सुखदुःखात्मके , सम्पद्-विपदात्मके जगति सज्जनाः एव मानवानां पथदर्शकाः आधारस्तम्भाः च भवन्ति । न तु केवलं सम्पदि ते प्रीत्या विनम्रतया परस्पर-सद्भावेन व्यवहरन्ति परन्तु सम्प्राप्ते विषमे काले अपि ते कर्तव्यपथात् न विचलन्ति । स्वार्थं विहाय स्वस्य सम्पत्तिं परदुःखनिवारणार्थं व्ययीकुर्वन्तः एते सज्जनाः एव राष्ट्रहितचिन्तकाः लक्ष्यन्ते ।

ईदृशैः सज्जनैः एव इदं विश्वम् उन्नीयते पाल्यते संवर्ध्यते च ।

## सुभाषितम्

- **सुजाता हळदीपुर, मुम्बई**

**यद्यप्यल्पो भवेत्कूपः तृषा तत्र निवार्यते ।**
**तृषाशान्तिर्यत्र नस्यादब्धिना किं प्रयोजनम् ।।**

**भावार्थः -**

यद्यपि कूपः सागरस्य अपेक्षया आकारेण लघुः अस्ति तथापि तृषाशमनार्थं तस्य जलमुपयुक्तमस्ति ।
सागरः विशालः भूत्वा अपि तस्य जलं तृषाशमनाय न उपयुज्यते ।
बाह्यस्वरूपस्य अपेक्षया गुणानां महत्त्वमधिकम् अस्ति ।

## प्रहेलिका

**– शीला कळावर , ठाणे**

गोपालो नैव गोपालस्त्रिशूली नैव शङ्करः ।
अपि चक्री स नो विष्णुर्यो जानाति स पण्डितः ॥

( उत्तरं दशमपृष्ठे दत्तम् )

# नवरात्रीमहोत्सवः

**– अनुराधा कर्पे , पालघर**

साम्प्रतवर्षे वर्षाकालः किञ्चित् सुदीर्घः जातः । कोरोनारोगस्य विपन्नावस्था-विषाद-विध्वंसरूपिणः त्रिशूलस्य परितापेन त्रस्ताः वयं सर्वे रोगनिवारणार्थं कृतेभ्यः निर्बन्धेभ्यः किञ्चित् शिथिलतां प्राप्य निश्चिन्तताम् अनुभूतवन्तः । तदनन्तरम् अतीव उत्कण्ठया यस्य प्रतीक्षा आसीत् सः आश्विजमासः पत्रपुष्पेषु सुवर्णवर्णस्य सिञ्चनं कुर्वन् प्रत्यक्षीभूतः । सः स्वस्य आगमनसमये घटस्थापनायाः शुभशकुनम् आनीय शुभङ्करं मङ्गलमयं चैतन्यमयं च वातावरणं निर्मितवान् । तस्मात् शारदीयनवरात्रमहोत्सवः शोभनः वर्णमयः हृदयङ्गमः च जातः ।



शारदीय-नवरात्र्याः आरम्भः मातुः शैलपुत्र्याः आगमनेन भवति । सा पर्वतकन्या अतः पार्वती । साक्षात् हिमालयकन्या अतः हैमवती । तस्याः वाहनं ऋषभः । तस्याः एकस्मिन् हस्ते त्रिशूलम् अपरहस्ते कमलपुष्पम् अस्ति । सुन्दरी चन्द्रकला तस्याः मस्तके विराजते । घटस्थापनायाः दिवसे स्त्रीशक्त्याः सन्देशदात्री एषा शैलपुत्री नवरात्र्याः प्रथमा मान्या देवी ।

नवरात्र्याः द्वितीयदिवसे पूजनीया देवी ब्रह्मचारिणी । महादेवं प्राप्तुं सहस्रवर्षाणि यावत् उग्रतपस्याम् आचरितवती । कठोरब्रह्मचर्यस्य आचरणेन ब्रह्मचारिणी इति नामधेयं प्राप्तं तया । तस्याः एकस्मिन् हस्ते रुद्राक्षमाला अपरहस्ते कमण्डलुः अस्ति । श्वेतवस्त्रावृता सा शुद्धता-भद्रता-पवित्रतायाः मूर्तिः एव ।

तृतीयदिने देवी चन्द्रघण्टा अवतरति । तस्याः महिमा अद्वितीया । शौर्यं पराक्रमः साहसः च तस्याः विशेषगुणाः । तस्याः रक्तवर्णः अनिर्बन्ध-ऊर्जायाः स्थैर्यस्य आत्मशान्तेः च प्रतीकः। सा दशभुजा , त्रिनेत्रा , व्याघ्रारूढा । भालप्रदेशे घण्टाकारः चन्द्रः । शूल-गदा-चक्र-खड्ग-चाप-बाण-जपमाला-कमल-कमण्डलु-ज्ञानमुद्रा-अभयमुद्रासहिता चन्द्रघण्टा हर्षोल्लासेन पूज्यते ।

देवी कूष्माण्डा चतुर्थदिने अवतरति । 'कु' इत्यर्थे लघु , ऊष्मा उष्णतां दर्शयति । अण्डं-बीजम् । स्वीय-वैश्विक-ऊर्जायाः उत्सर्जनतः विश्वनिर्मितिं कृत्वा स्मितहास्येन जीवने चैतन्यं प्रसारयति ।

नवरात्र्याः पञ्चमदिने स्कन्दमाता पूज्यते । कार्तिकेयस्य जननी । चतुर्भुजा , सिंहाधिष्ठिता , अभयमुद्राङ्किता । आशायाः तथा सकारात्मकतायाः प्रतिमा । अग्नेः देवता इति सुख्यातिः तया प्राप्ता ।

षष्ठदिवसे देवी कात्यायनी अवतरति। सा महिषासुरमर्दिनी । दश वा अष्टादशभुजा सा दिव्यानि आयुधानि धृत्वा दुष्टराक्षसाणां संहारेण विश्वरक्षणं कृतवती । देवी अम्बिका इति तस्याः अपरं नाम ।

देवी कालरात्री सप्तम्यां तिथौ अवतरति । उग्ररूपा , कृष्णवर्णा , मुक्तकेशा तथा च भयङ्करस्वरूपिणी । कालः इत्युक्ते साक्षात् मृत्युः । तस्यापि दमनकर्त्री एषा कालरात्री । भक्ताः धैर्यं तथा शान्तिं वरदानरूपेण कालरात्रीतः प्राप्नुवन्ति ।

अष्टमदिवसे पूजनीया देवी महागौरी । उदयकालस्य सूर्यमण्डलवत् तस्याः कान्तिः विभाति । चतुर्भुजा , त्रिनेत्रधारिणी , अभयमुद्राङ्किता सा दक्षिणहस्ते त्रिशूलं , वामहस्ते डमरुं धारयति ।

नवम्यां मङ्गलदिवसे देवी सिद्धिदात्री पूज्यते । सा सर्वाः मनोकामनाः पूर्तिं नयति । अष्टसिद्धीनां स्वामिनी । कमल-गदा-चक्र-शङ्खधारिणी सिद्धिदात्री पार्वत्याः मूलस्वरूपम् ।

नवरात्रिकाले प्रतिदिनं पुण्यदिनमस्ति यतः जगज्जनन्या दुर्गादेव्या महिषासुरः , रक्तबीजः , शुम्भनिशुम्भ-चण्डमुण्ड- तारकासुरः इत्यादीनां दुष्टराक्षसाणां संहारेण अखिलविश्वकल्याणं कृतम् ।

नवरात्र्याः निमित्तेन वयं सङ्कल्पं कुर्मः यत् अस्माकं हीनतां दीनतां जडतां च त्यक्त्वा श्रद्धया आस्थया नियमेन च देव्याः सभक्तिम् उपासनां कृत्वा अस्माकं संवित्पथम् अधिकाधिकं समृद्धं कुर्मः ।

## श्रद्धा

**- सुधा भट कल्याणपुर , मङ्गळूरु**

एकः रुग्णः एकस्मिन् दिने चिकित्सालये वैद्येन सह वार्ताविनिमयं कुर्वन् आसीत् । प्रस्थानपूर्वं सः वैद्यम् उद्दिश्य उक्तवान् – " भोः अहं मरणात् बहु भीतः अस्मि । मरणोत्तरं किम् अस्ति इति भवान् वदति वा ? " वैद्यः गम्भीरतया उक्तवान् – " अहम् अपि न जानामि । " तदा रुग्णः उक्तवान् – " किम् ? न जानाति ? कथं न जानाति ? भवान् अत्यन्तं धर्मनिष्ठः प्रकृत्या पापभीरुः च । मरणस्य पश्चात् किम् अस्ति न जानाति भवान् ? " तदा वैद्यः पृष्ठस्थितद्वार- वारङ्गे तस्य हस्तं स्थापितवान् । द्वारात् बहिः कोऽपि शब्दः अभवत् । वैद्यः द्वारम् उद्घाटितवान् । तत्क्षणे एव एकः श्वानः प्रकोष्ठं प्रविश्य वैद्यस्य उपरि उत्प्लुत्य , आनन्देन तं जिह्वया लालितवान् ।

वैद्यः रुग्णम् अवदत् " भवान् मम श्वानं पश्यतु । पूर्वं सः कदापि अस्मिन् प्रकोष्ठं न आगतवान् , अत्र किम् अस्ति सः न ज्ञातवान् । किन्तु तस्य स्वामी अत्र अस्ति , एतं विषयम् एव सः ज्ञातवान् आसीत् । यदा अहं द्वारम् उद्घाटितवान् तदा सः भयंविना मम उपरि लुम्पितवान् । अहमपि मरणोत्तरं किमस्ति , कथमस्ति एतत् न जानामि । परन्तु मम गुरुः तत्र अस्ति इति अहं निश्चयेन जानामि । मम कृते एतदेव पर्याप्तम् । "

# सौरसूक्तम्

– संयुक्ता कैकिणी, मुम्बई

सूर्यदेवतामुद्दिश्य ऋग्वेदे सङ्कीर्णानां केषाञ्चित् मन्त्रविशेषाणां सङ्कलनं सौरसूक्तम् इत्युच्यते। अस्य सौरसूक्तस्य पठनं काञ्चित् विशिष्टां पद्धतिमनुसरति। नित्यपठनार्थमेका आवृत्तिः वा द्वादश आवृत्तयः वा अवलम्ब्यन्ते। द्वादश आवृत्तयः सूर्यस्य एकादशिनी इति ख्याताः। एवंविधाभिः द्वादशभिः एकादशिनीभिः (१४४ आवृत्तिभिः) एको लघुसूर्यो भवति । ततश्च एवंविधैः द्वादशभिः लघुसूर्यैः एको महासूर्यः तथैव द्वादशभिश्च महासूर्यैः एकः अतिसूर्यो भवति। अत्र प्रत्येकस्य ऋग्वेदमन्त्रस्य सन्दर्भः कंसे निर्दिष्टोऽस्ति, तत्र प्रथमः क्रमाङ्कः मण्डलविशेषं, द्वितीयः सूक्तविशेषं, तृतीयश्च ऋग्विशेषं द्योतयति।

साष्टाङ्गप्रणिपातैः आराधयन् उपासकः सूर्यस्य प्रियो भवति किल ? तस्मात् कैश्चित् उपासकैः सौरसूक्तान्तर्गतमन्त्राणाम् उच्चारणेन सहितः साष्टाङ्गनमस्कारविधिः उपादीयते। तथैव अस्मिन् सूक्ते समाविष्टाः विविधाः मन्त्राः विविधानां फलानां प्राप्त्यर्थं सन्ति इत्यपि विद्यते जनानां श्रद्धा। तथा हि मित्रमह' इति (१-५०-११) एकादशस्य मन्त्रस्य जपः हृद्रोगविनाशार्थं यावत् 'तच्चक्षुर्देवहितं' इति (७-६६-१६) पञ्चत्रिंशत्तमस्य मन्त्रस्य जपः सुदृष्टिलाभाय यावत् ' सविता पश्चात्तात् ' इति (१०-३६-१४) पञ्चषष्टितमस्य अन्तिमस्य मन्त्रस्य जपः सर्वाङ्गीण-संरक्षणार्थमस्ति इति उपासकानां दृढविश्वासः।

**उद्यन्नद्य मित्रमह आरोहन् उत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥११॥**

**अर्थः –** भो मित्र! दिवि समुन्नतं स्थानम् आरोहन् , मे हृद्रोगं तथा कान्तिहरं रोगं नाशं नय ॥११॥ (१-५०-११)

**तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतम् ॥३५॥**

**अर्थः –** देवैः (आकाशे) संस्थापितं रवेः इदं भास्वरं विलोचनं वयं शरदः शतं नूनं पश्येम जीवेम च शरदः शतम् ॥३५॥ (७-६६-१६)

**सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्सविताधरात्तात्।**

**सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥६५॥**

**अर्थः –** पूर्वां पश्चिमां दक्षिणाम् उत्तरां च दिशः व्याप्य अधस्तात् उपरिष्टात् च सविता सदा विराजते। (अस्माभिः) वाञ्छितं वित्तादि दीर्घम् आयुः च सः ददातु नः ॥६५॥ (१०-३६-१४)

अथ मानवानां सर्वथा सुदृढायुरारोग्यलाभाय साष्टाङ्गप्रणिपातैः सह विहितं मन्त्रोच्चारणं वर्तते भगवतः सूर्यदेवस्य उपासना।

## बालरञ्जनी

# परिश्रमस्य फलम्

**– अनन्तकृष्ण हिरेबेट् , बेङ्गळूरु**


दया बाळे कोप्पिकर, न्यू जर्सी

एकस्मिन् ग्रामे कश्चन महान् गुरुः आसीत् । तस्य द्वौ छात्रौ आस्ताम् । एकस्य नाम रामदेवः । अपरस्य नाम सोमदेवः। रामदेवः आसीत् चतुरः। अतः सः गुरुणा बोधिताः सर्वाः विद्याः शीघ्रम् अवगतवान् । सोमदेवः तु आसीत् बोधग्रहणे मन्दः । सः गुरूपदेशग्रहणे असफलः भूत्वा शिक्षणं प्राप्तुम् असमर्थः अभवत् । सोमदेवं पाठयितुं गुरुणा अनेकवारं कृताः सर्वे प्रयत्नाः विफलाः जाताः । रामदेवः सर्वदा सोमदेवस्य मन्दमतिम् उद्दिश्य तस्य उपहासं करोति स्म | अनेन कारणेन खिन्नः सोमदेवः गुरुं न सूचयित्वा एव आश्रमात् पलायितवान् | सः स्वग्रामं प्रतिगन्तुम् आरब्धवान् । मार्गमध्ये तृषितः सोमदेवः जलं पातुं कस्यचित् कूपस्य समीपे गतवान् । तत्र कूपं परितः शिलायां मुद्रितानि कानिचन चिह्नानि सः दृष्टवान् ।

सुदीर्घचिन्तनानन्तरं सः ज्ञातवान् यत् तानि चिह्नानि जलपूर्णघटानां पुनः पुनः स्थापनेन एव उत्पन्नानि इति । तदा सः चिन्तितवान् यत् शिलायाम् अपि घटाः यदि चिह्नानि कर्तुं शक्नुवन्ति , तर्हि अहं किमर्थं शिक्षणं प्राप्तुम् असमर्थः ? शिलानाम् अपेक्षया अहम् अधःस्थः अस्मि किम् इति । परिश्रमं कृत्वा विद्यार्जनं करणीयम् इति सः निश्चितवान् । सः पुनः गुरुकुलं गत्वा गुरोः क्षमां याचितवान् । कठिनपरिश्रमेण सः विद्याभ्यासं कृतवान् । गुरोराशीर्वादान् सम्प्राप्य सः महान् विद्वान् अभवत् ।

अत एव उच्यते यत् ' परिश्रमः शुभाय ' इति ।

( कन्नडकथा - आधारितः )

## हास्यकणिका

**– वृन्दा चन्दावर , मुम्बई**

प्यारेलालः दीपावलिनिमित्तेन स्वस्य कृते चिरागदिन्-संस्थायाः एकम् ऊरुकं क्रीणाति । तस्य मूल्यम् अस्ति द्विसहस्ररूप्यकाणि ।

गृहं गत्वा सः भार्यायै दर्शयति ।

भार्या – शोभनम् ऊरुकम् ... कियत् मूल्यम् ?

प्यारेलालः – (भार्या तर्जयेत् इति विचिन्त्य) द्विशतरूप्यकाणि ।

भार्या – केवलं द्विशतरूप्यकाणि ? अत्युत्तमम् ! तर्हि एतद् ऊरुकम् अहं दीपावलिनिमित्तेन मम भ्रात्रे किशनाय उपहाररूपेण ददामि । भवान् द्विशतरूप्यकाणाम् अन्यत् ऊरुकं क्रीणातु ।

बालरञ्जनी

## भीमसेनस्य गर्वभङ्गः

-स्नेहल खम्बदकोण , दाण्डेली

पाण्डवानां वनवासकालः आसीत् । ते रमणीयेषु काननेषु निवासम् अकुर्वन् । एकदा द्रौपदी वायुना आनीतं सुन्दरं पुष्पम् एकम् अपश्यत्। तस्य पुष्पस्य गन्धम् आघ्राय सा आकृष्टा । ततः सा द्रौपदी पतिं भीमसेनम् अवदत् , " एतादृशानि रमणीयानि पुष्पाणि बहूनि मह्यम् आनयतु " इति ।



दया बाळे कोप्पिकर, न्यू जर्सी

भीमसेनः अहमेव लोके बलवान् इति गर्वितः आसीत् । सः द्रौपद्याः कृते पुष्पाणि आनेतुम् उत्साहेन प्रस्थितः । सः बहुत्र अन्विष्य अन्ते एकस्मिन् उद्याने तानि पुष्पाणि दूरात् ऐक्षत । यदा उद्यानं प्राप्तुं सः उद्युक्तः तदा मार्गे शयानम् एकं कपिम् अपश्यत् । तस्य कपेः पुच्छेन भीमसेनस्य मार्गः अवरोधितः । सगर्वं भीमसेनः तस्य समीपं गत्वा, "अरे ! वानर! उत्तिष्ठ । तव पुच्छं मम मार्गं प्रतिरोधयति । अहम् एतेन मार्गेण गन्तुम् इच्छामि " इति अवदत् । तदा सः वानरः अवदत्, " भोः अहम् अतीव वृद्धः । अत्र वने निवसामि । पुच्छम् उत्थापयितुम् अहम् असमर्थः। अतः त्वमेव मम पुच्छम् अपसार्य गच्छ " इति।

तदा अत्यन्तं क्रुद्धः भीमसेनः , " पुच्छं गृहीत्वा एतं वानरम् आकाशे भ्रामयित्वा यमलोकं प्रापयामि " इति उक्त्वा वानरस्य लाङ्गूलं स्वीकर्तुम् उद्युक्तः । किन्तु बहुधा प्रयत्नं कृत्वा अपि सः पुच्छस्य दूरीकरणे असफलः जातः । तेन भीमस्य गर्वभङ्गः जातः । सः वानरं प्रार्थयत, " कपिश्रेष्ठ ! महता प्रयत्नेन अपि भवतः पुच्छम् ईशदपि चालयितुम् अहम् अशक्तः भवामि । भवान् न सामान्यः कपिः इति प्रतिभाति । कृपया वदतु भवान् देवः वा गन्धर्वः वा सिद्धपुरुषः वा' इति । सः कपिः शान्तम् उत्तरं प्रयच्छत् , " भोः अहम् आञ्जनेयः । अहम् अपि वायुपुत्रः। तस्मात् अहं तव भ्राता भवामि । " ततः आञ्जनेयः भीमं बहुभिः आशीर्भिः अनुगृहीतवान् ।

## शब्दपटः

– शिल्पा मुद्गर , मुम्बई

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | | ली | ■ | २ | ३ | लः |
| | ■ | ■ | ■ | ■ | | ■ |
| ■ | ४ | | चा | | ■ | ■ |
| ५ | ■ | ■ | ■ | ■ | ■ | ६ |
| ७ | ह | | | ■ | ■ | को |
| | ■ | ■ | ■ | ■ | ■ | |
| | ■ | ■ | ८ | | | |

**वामतः दक्षिणम् →**

१ - द्रौपद्याः नाम (३)
२ - पाण्डव-यमलयोः एकः (३)
४ - पाण्डवानां गुरुः (४)
७ - पाण्डव-यमलयोः अपरः (४)
८ - पाण्डवेषु ज्येष्ठः (४)

**उपरिष्टात् अधः ↓**

१ - अर्जुनस्य अन्यत् नाम (२)
३ - पाण्डवानां माता (२)
५ - महाभारत-ग्रन्थस्य रचयिता (४)
६ - भीमस्य अन्यत् नाम (४)

(उत्तराणि दशमपृष्ठे दत्तानि )

दीर्घा कथा

# दर्शनम्

( पूर्वार्धः )

- **सुमन हिरेबेट् , बेङ्गलूरु**

महेशरावः तथा गौरी अमेरिकातः आगतेन एकमात्रपुत्रेण वसन्तेन सह बहूनि तीर्थक्षेत्राणि सन्दृश्य अन्ते श्रीशैलक्षेत्रं प्राप्तौ । तदा स्मितवदना गौरी उक्तवती – " पुत्र , बहुशः तीर्थक्षेत्राणि निसर्गमातुः अङ्के एव स्थितानि । " ततः महेशरावः – " यथा समुद्रतटेषु स्थापिताः उन्नत-दीपस्तम्भाः रात्रौ समुद्रयात्रिकाणां मार्गदर्शनं कुर्वन्ति धैर्यं च जनयन्ति तथैव तीर्थक्षेत्राणि संसारसमुद्रे पतितेषु अस्मासु श्रद्धाभक्तिं च प्रचोदयन्ति " इति उक्तवान् । तेषां सम्भाषणं श्रुण्वन् कश्चिद् यात्रिकः उक्तवान् – " सत्यमुक्तम् भवता । एतत् श्रीशैलक्षेत्रमपि द्वादशज्योतिर्लिङ्गेषु अन्यतमम् । अत्रैव सुप्रसिद्ध-शिवशरणा-अक्कामहादेवी कदलीवने अन्तर्हिता । "

तदा महेशरावः उक्तवान् – " श्रीजगद्गुरुशङ्करभगवत्पादाचार्याः सञ्चरन्तः उपनिषत्सु प्रतिपादितम् अद्वैतसिद्धान्तं सर्वत्र बोधयन्तः श्रीशैलक्षेत्रमपि प्राप्ताः । श्रीमल्लिकार्जुनमहादेवं सम्पूज्य शिवानन्दलहरी , श्रीभ्रमराम्बाम् आराध्य सौन्दर्यलहरीति स्तोत्रद्वयं रचितवन्तः इति ख्यातिरस्ति । अस्माकं श्रीचित्रापुरसारस्वतानां परमपूज्याः श्रीमदानन्दाश्रम-योगिवर्याः एतत् क्षेत्रं १९४८ तमे वर्षे कारयानेन समागताः । पेद्दचेरुवु-ग्रामपर्यन्तमेव कारयानं गतम् , ततः स्थगितमेव । तदा परमपूज्याः गुरुवर्याः सुकोमलपदाभ्यामेव श्रीशैलक्षेत्रं सम्प्राप्य पुनः शताधिकसोपानानि अवतीर्य पातालगङ्गायां स्नानं समाप्य श्रीभगवतः मल्लिकार्जुनदेवस्य पूजां सम्पादितवन्तः । धन्याः वयं सारस्वताः खलु ? " इति उक्त्वा भक्तिपूर्वकं नमस्कृतवान् । तदा गौरी – " सत्यमेव उक्तं भवता । अस्माकं परमपूज्य-श्रीपरिज्ञानाश्रमगुरुवर्यैः कण्ठे सर्पधारणम् , परमपूज्य-श्रीसद्योजात-शङ्कराश्रमगुरुवर्यैः साक्षात् कैलासपर्वतात् आत्मलिङ्गस्य प्रापणम् ... सर्वम् अलौकिकम् एव " इति उक्त्वा भक्तिपूर्वकं नमस्कृतवती । एवं सर्वे सम्भाषणे निरताः गच्छन्तः आसन् ।

पुत्रः वसन्तः गमनसमये एव निसर्गस्य भावचित्राणि टङ्कयन् आसीत् । वृक्षस्य अधः एकः मयूरः स्वपिच्छान् पूर्णरूपेण प्रसार्य ममापि भावचित्रं टङ्कयतु इति स्थितः दृष्टः । स्वल्पसमयाद् अनन्तरम् एव "जय शङ्कर ! जय मल्लिकार्जुन !" इति जयघोषः श्रुतः । तदा श्रीमल्लिकार्जुनस्य देवालयः अत्रैव समीप एव स्यादिति ज्ञात्वा सर्वे शीघ्रमेव तत्र गताः। श्रीमहादेवस्य तथा देवीभ्रमराम्बायाः पूजामपि सम्पादितवन्तः । ततः महेशरावः गौरीमुद्दिश्य - " अयि , यदा वयं दर्शनार्थं पङ्क्त्यां स्थिताः तदा कश्चन वृद्धः मामेव पश्यन्नासीत् । कः स्यात् सः ? " इति पृष्टवान् । तदा गौरी – " आम् , अहमपि तं वृद्धं दृष्टवती । सः बहुशः भवतः कार्यालयात् पूर्वनिवृत्तः अधिकारी स्यात् । भवानेव विस्मृतवान् " इत्युक्तवती । तदैव सः वृद्धः पत्न्या सह समीपमागत्य - "

नमस्कारः ! वयं परस्परं न जानीमः तथापि अद्य भोजनानन्तरं मम भाटककक्षं कृपया आगच्छन्तु , मा निराकुर्वन्तु" इति प्रार्थितवान् । तदा गौरी - "अस्तु गच्छाम" इति नयनसङ्केतेन एव सूचितवती ।

**( कः सः वृद्धः ? सः किमर्थं महेशरावाय आमन्त्रणं दत्तवान् , अग्रे किं भवति ... कथायाः उत्तरार्धं पठन्तु अग्रिमपत्रिकायाम् । )**



## राष्ट्रवन्दना

**– रश्मि नागरकट्टी हेम्माडी , बेङ्गळूरु**

पूजयामः संसेवयामः
भारतराष्ट्रं वयम् अर्चयामः ॥धृ॥
उत्तर-प्राची-दक्षिण-प्रतीच्याम्
विस्तृतः अस्ति अस्माकं देशः
काश्मीरतः कन्याकुमारीपर्यन्तम्
ततः गरीयसी अस्ति देशस्य संस्कृतिः ॥१॥

वसुधैव कुटुम्बकम् इति
एक एव मन्त्रजपः
प्रचलन् अस्ति गृहे गृहे ॥२॥

बालः वा युवती वा युवकः
अथवा अस्ति वृद्धा-वृद्धः
सर्वे राष्ट्रभक्तिं वहेयुः
भारतदेशं सशक्तं कुर्युः ॥३॥

आत्मनिर्भरता महनीयविश्वासः
यत्र यत्र दीव्यतः
तत्र तत्र यशः अभिवृद्धिः च
उच्चत्वम् आप्नुतः ॥४॥

## चिन्त्यताम्

साक्षरा विपरीताश्चेद्
राक्षसा एव केवलम् ।
सरसो विपरीताश्चेदत्
सरसत्वं न मुञ्चति ॥

## उत्तराणि

**शब्दपटः –**
→ १ – पाञ्चाली ; २ – नकुलः ; ४ - द्रोणाचार्यः ;
७ – सहदेवः ; ८ – युधिष्ठिरः
↓ १ – पार्थः ; ३ – कुन्ती ; ५ – व्यासमुनिः ;
६ – वृकोदरः

**प्रहेलिका –**
**उत्तरम् – वृषभः ।**
गोपालः - धेनूनां पतित्वात् पालकः ।
तप्तत्रिशूलाङ्कितत्वात् चिह्नवान् ।
तप्तचक्राङ्कितत्वात् चिह्नवान् ।

# बाणः

**– कृष्णानन्द मङ्कीकर , मुम्बई**

" कादम्बरी-रसज्ञानाम् आहारोऽपि न रोचते " इति यस्य कृतेः वर्णनं कुर्वन्ति सः बाणभट्टः ख्रिस्ताब्देः सप्तमे शतके अवसत् । उपर्युक्ते वाक्ये " कादम्बरी-रसज्ञानाम् आहारोऽपि न रोचते " इत्यत्र श्लेषालङ्कारोऽपि दृश्यताम् । कादम्बरी एतत् एकस्याः सुरायाः नाम !

बाणस्य " कादम्बरी " तथा " हर्षचरितम् " इति द्वे कृती अतिप्रख्याते ।

तस्य " कादम्बरी " नाम्नी साहित्य-कृतिः न तु संस्कृत-गद्यकाव्यस्य एकम् अत्युत्तमम् उदाहरणं परन्तु जगति " कादम्बरी " इति वाङ्मयप्रकारेषु प्रथमा कृतिः इति विद्वांसो मन्यन्ते । एतस्मिन् ग्रन्थे, द्वयोः युगलयोः जन्मजन्मान्तराणां कथा अस्ति । दुर्भाग्यवशात् बाणः इमां कृतिं पूर्णतां नेतुं न समर्थः तस्मात् कादम्बर्याः उत्तरार्धः बाणस्य पुत्रेण भूषणभट्टेन लिखितः ।

बाणस्य प्रदीर्घसमासयुक्ताः शब्दाः तु तस्य लेखनस्य विशेषता । कादम्बर्यां प्रदीर्घाः शब्दाः दृश्यन्ते (अनेके शब्दाः शतोत्तराक्षराः) । एतावता शब्दप्रयोगेन तस्य भाषा यद्यपि किञ्चित् क्लिष्टा (अर्वाचीन-वाचकानां कृते) परन्तु बाणस्य प्रभावः संस्कृतवाङ्मयस्य उपरि अद्वितीय एव आसीत् । कादम्बर्याः शीतगृहस्य वर्णनं पठन् ग्रीष्मकालेऽपि शैत्यम् अनुभवेत् इति पूर्वसूरयः कथयन्नासन् ।

इदमेकं वर्णनं पश्यन्तु **" घर्घरिकास्फालनप्रकम्पझणझणायमानमणिकर्णपूरः " । घर्घरिका एकः मृदङ्गविशेषः, घर्घरिकायाः आस्फालनेन ( कृतध्वनिना ) प्रकम्प-झणझणायमान ( प्रकम्पेन शब्दं कुर्वन् ) मणि-कर्णपूरः ( मणियुक्तं कर्णाभरणं )** एकस्मिन्नेव शब्दे, राजप्रासादे घर्घरिकया कृतः घनीभूत एव ध्वनिः तथा ध्वनेः तरङ्गा एव कर्णपूरं झणझणायन्ते इति दृश्यं साक्षादस्माकं मनश्चक्षुःपुरतः आविर्भवति । तथा झणझणायमान इत्येकः कदाचित् नूतनः शब्दः बाणेन अत्र निर्मितः दृश्यते । इत्येकशब्दस्य यदि ईदृशी किमया , तर्हि विचिन्तयतां सम्पूर्णः ग्रन्थः कथं चमत्कृतिपूर्णैः वाक्यैः पूरितो भवेत् ?

तस्य हर्षचरितं तु हर्षराजस्य " चरित्रग्रन्थः " इति ग्रन्थप्रकारेषु अपि प्रायशः प्रथमः एव । एतस्मिन् ग्रन्थे, बाणेन किञ्चित्स्वचरित्रमपि लिखित्वा तस्य परिचयः दत्तः । अयमस्माकं कृते एकः अलभ्यः लाभ एव यदनेकेषां पूर्वसूरीणां चरित्रविषये अत्यन्तम् अल्पं विवरणम् उपलब्धम् अस्ति ।

भाषासौन्दर्यम् , अलङ्काराणां योजना , शब्दवैचित्र्यम् , उपमानां मालाः , वाक्येषु वातावरणस्य प्रत्यक्षानुभूतिः इत्यादयः अनुभवितुं बाणस्य कृती अवश्यमेव अधीतव्ये । इत्यलम् ।

शुभं भवतु ।

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**संस्कृताध्ययनार्थं जालाधारित-प्रबोधवर्गस्य (online classes) पञ्जीकरणार्थं सम्पर्कः -**
**Email id: prabodhah@chitrapurmath.net.in**